Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 1 | ISSN : 2581- 6306

# कृष्णमुक्तामालर्याकाव्ये आगतानां छन्दसां लक्षणानि



**मीनाक्षी सिंहः**

शोधच्छात्रा,

केन्द्रीयसंस्कृतविश्वविद्यालयः गंगानाथझा,

परिसरः, प्रयागराजः, उत्तरप्रदेशः, भारतम्।

**सारांशः** – गीतिवृत्तस्य वर्णनं वर्तते। कृष्णमुक्तामालार्याकाव्यस्य आर्याछन्द एकमुक्तायाः भांति सर्वाणि श्लोकानि बद्धम् कुर्वः।

**मुख्यशब्दः** – श्रीमन्मयूरकविकृतम्, कृष्णमुक्तामालार्या, काव्यम्, संस्कृतम्, साहित्यम्, छन्दः, मात्रा।

**कृष्णमुक्तामालार्याकाव्यस्य परिचयः** – कृष्णमुक्तामालार्या काव्यस्य रचयितुः नाम श्रीमन्मयूरकविकृतम् अभिलाजगत्यकसंधविनिहत्यै। आर्यामुक्तामाला ग्रंथंविवृणोमि कृष्ण संतुत्यै।

कृष्णमुक्तामालार्याकाव्ये काव्ये आगतानां छन्दसां लक्षणानि–छन्दस–शब्दस्य व्युत्पत्तिः छन्दश्शब्दस्य निष्पत्तिः चुरादि गणीयायाः 'छदि संवरणे' धातोः असुन् प्रत्यये कृते सति भवति। छन्दस् इति शब्दस्य प्रयोग अर्थद्वेये भवति।

**"आच्छादनम् आह्लादञ्चेति"**

आच्छादनान्तर्गतं छन्दः रसभाव–वर्ण्य–विषयान् आच्छादयति आह्लादनार्थे च मानवमनः रञ्जयति। छन्दस् शब्दस्य व्युत्पत्तिः छदि संवरणे छद् संवरणे, छद् अपवारणे, छदि आह्लादनेनापि भवति। यास्कमुनिः 'छद्' संवरणे इति छातोः छन्दशब्दस्य निष्पत्तिम् अमन्यत्।

**'छन्दः पादौ तु वेदस्य'**

वैदिक वाङ्गमये छन्दसां अनेके अर्था उपलब्धाः। ऋग्वेदे सूर्यरश्मिम्यर्थे छन्दशब्दस्य प्रयोगो मिलति।

**"श्रियो छन्दे न स्मर्यते विभाति।'**

कौषितकि ब्राह्मणे छन्दांसि प्राणाः अभिमताः सन्ति।

**"प्राणा वै छन्दांसि"**

निष्कर्षतः छन्दांसि वेदानां नियामकानि सन्ति। यथा वेदमन्त्रद्रष्टारः ऋषयो भवन्ति तथैव छन्दसामपि द्रष्टारः ऋषयो भवन्ति। वैदिककाले छन्दसाम् अति महत्वमासीत्। छन्दसां महत्वस्य आकलम् अनेनैव कर्तुं शक्यते यत् छन्दसां गणना वेदाङ्गेषु वर्तते।

''छन्दः वेदस्य पादौ'' यथा पादहीन व्यक्तिः गमने असमर्थौं भवति तथैव छन्दोबिना वेदस्य गतिर्नभवति। अतः वेदाः छन्दसाम् उपरि आश्रिताः सन्ति। छन्दोज्ञानं बिना वेदापाठः पापं मन्यते। वेदमन्त्रान् छन्दांसि रक्षन्ति। अतः छन्दसां षड्वेदाङ्गेषु गणना महत्वपूर्ण अस्ति। छन्दंसि वेदेभ्यः अपि प्राचीनानि सन्ति।

यतोहि वेदेषु छन्दसां विकसितं रूपं मिलति। संसारे कोऽपि पदार्थः क्रमशः विकासं कृत्वा विकसितरूपं लभते। यथा मनुष्यः सर्वप्रथम वक्तुं शिक्षाम् अगृह्णात् व्याकरणस्य आविष्कारः पश्चादभूतः तथैव छन्दांसि अपि प्रारंम्भाव स्थातः विकसितं रूपं प्राप्नुवन्ति स्म। सर्वप्रथमं मनुष्यः स्व विचारान् पद्यरूपेण प्रकटयन्ति स्म।

वेदमन्त्राः छन्दसां माध्यमेन स्वकीयम् अभिव्यञ्जनां कुर्वन्ति। वैदिककाले छन्दसां महत्वस्य आकलनम् एतानैव कर्तुं शक्यते यत् पुरा छन्दांसि ज्ञानं बिना वेदाध्ययनं निषिद्धम् आसीत्।

वैदिक काले मुख्यतः सप्त छन्दांसि प्रमुखानि आसन्। गायत्री, उष्णिक, अनुष्टुप, बृहती पंक्ति, त्रिष्टुप, जगती इति। एतैरेव वैदिक कालीन छन्दोभिः लौकिक छन्दसामपि विकासः सन्जातः।

लौकिक साहित्येऽपि छन्दसां प्रयोगः भवति। तत् आस्वादनाम् अपि आवश्यकं छन्दसां ज्ञानं बभूव।

अस्मिन् ग्रन्थे आसमाप्ति गीतिवृत्तं वर्तते। अथ आर्या मात्रिक छन्दः वर्तते। अस्मिन् ग्रन्थे आर्या छन्दस्य गीतिवृत्तं प्रयोगः वर्तते।

**आर्यासामान्य लक्षणम्**

''लक्ष्मैतत्सप्त गणा गोपेता भवति मेह विषमे जः।
षष्ठोऽयं नलघू वा, प्रथमेऽर्थे नियतमार्यायाः।।1।
''षष्ठे द्वितीयालात्परके न्ले, मुखालाच्च सयतिपदनियमः।
चरमेऽर्थे पञ्चमके, तस्मादिह भवति षष्ठो लः।।2।

आर्यामात्रा छन्दोऽस्ति, अस्य पूर्वार्धे सप्त मात्रागणाः भवेयुः एवं तत् पश्चात् अन्ते गुरु (दीर्घ) वर्णस्येव निवेशयेत्। द्वौ लघुवर्णौ न। तथा सप्त मात्रागणेषु विषमस्थानेषु अर्थात्। प्रथम, तृतीय, पञ्चम एवं सप्तमी गणेषु अक्षरप्रधानमध्यगुरूः जगणस्य निवेशयेत्। षष्ठ स्थानेषु या तु जगणस्य निवेशयेत् अथवा सर्वलघु चतुर्मात्रिकगणस्य निवेशयेत्।

**आर्या के भेद :**

**''पथ्या, विपुला, चपला मुखचपला जघनचलपनान्य**
**गीत्युपगीत्युद्गीतय आर्यागीतिश्च नवधा आर्या।''**

**पथ्या –**

**त्रिष्वंशकेषु पादो दलयोराद्येषु दृश्यते यस्याः।**
**पथ्येति नाम तस्याश्छन्दोविद्भिः समाख्यातम्।।**

यस्या आर्यायाः द्वयोः दलयोः प्रथम त्रियः गणेभ्यः अन्तेषु पादस्य समाप्तिभर्वति। तस्य छन्दःशास्त्रस्य विद्वांसः 'पथ्या' नाम कथ्यन्ते।

यस्य प्रथमपादे द्वादश मात्रा च द्वितीये अष्टादश तथा तृतीये द्वादश च चर्तुथके पञ्चदश मात्रा सः पथ्या आर्या वर्तते।

**विपुलार्या लक्षणम् –**

**"संलङ्घय गणत्रयमादिमं, शकलयोर्द्वयोर्भवति पादः।**
**यस्यास्तां पिंगलनागो विपुलामिति समाख्याति।।"**

यस्याः आर्यायाः द्वयोः दलयोः प्रथमत्रिभ्यः गणेभ्यः पादस्य समाप्ति वर्तते। सा विपुला वर्तते इति पिंगलाचार्यः कथ्यते।

**चपला–**

**उभयार्धयोर्जकारौ द्वितीयतुर्यौ गमध्यगौ यस्याः।**
**चपलेतिनाम तस्याः प्रकीर्तितं नाग–राजेन।**

चपलायां प्रथम गण अन्त गुरूः द्वितीय जगणः तृतीय द्वौ गुरौ, चतुर्थः जगणः पञ्चमगण च आदिगुरुः भवेत् चपलायाः द्वौ भेदौ वर्तेते– 1. मुखचपला, 2. जघनचपला।

**गीति लक्षणम् –**

**आर्या प्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः।**
**दलयोः कृतयतिशोभां तां गीतिं गीतवान्भुजङ्गेशः।**

गीतिछन्दस्य पूर्वार्धे एकगुरू साहितसप्त गणाः अर्थात् त्रिंशत् मात्राः भवन्ति उत्तरार्धे चापि। एतएव अस्याम् यतिस्थानं द्वयोः दलयोः एकमेव गीति–छन्दः वर्तते यत् अतिसुन्दरं मनोहरं च वर्तते।

श्रृणोतु मनोहरताप्राप्नोति। अतएव अस्य छन्दस्य 'गीति' इति कथ्यते।
कृष्णमुक्तामालार्या ग्रन्थे गीतिवृत्तस्य प्रयोगः वर्तते अतः उदाहरणम्–
ऽ । ।ऽ।। ऽऽऽ । । । ।ऽ ।ऽ।ऽऽऽ– **30मात्रा**
1. **केशव केशव तुल्यानत्वयि विमुखाः खलामलाकाराः।**
ऽ ऽ । ।ऽऽ । । । ऽऽऽ ।ऽ। ।ऽऽऽ – **30मात्रा**
**भक्तास्तवसक्तास्तवनति पूजासुप्रभोजनकेधन्याः।।1।।**
2. ऽऽ ।ऽ ।।ऽ ऽऽऽ ।ऽ ।ऽऽ।ऽऽ
**हृत्रस्तकस्यकवेः कालाछुतरत्नसानुकंपस्य।**
।। ऽ।ऽ।ऽऽ ।ऽ ।ऽऽ ।ऽऽ ।ऽऽ
**तव संश्रयेन्नपादौश्रित चिंतारत्नसानुकंपस्य।।2।।**
**कृष्णमुक्तामालाऽर्याग्रन्थे प्रारम्भात्। (111श्लोक)**

पर्यन्तम् गीतिवृत्तस्य वर्णनं वर्तते। अस्य ग्रन्थस्य आर्याछन्द एकमुक्तायाः भांति सर्वाणि श्लोकानि बद्धम् कुर्वः।

**सन्दर्भ ग्रन्थ सूची**–


1.छन्दोमंजरी गंगादास

2.छन्दोऽलंकारसौरभम्

3.पिंगलछन्दशास्त्र

4.केदारभट्ट (वृत्तरत्नाकर)

5.छन्दशास्त्र का भाष्य –भट्ट हलायुध (10वीं सताब्दी)